# आचार्यप्रथमवर्षम्

## तृतीयपत्रम्-नव्यन्यायः

## शैक्षिककनिष्पत्तिः

**ग्रन्थः – न्यायकुसुमाञ्जलिः,**
**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

- ❖ कार्यकारणभावसाधनं, अदृष्टसिद्धिं, सृष्टेः आकस्मिकत्वनिराकरणं, मीमांसकसम्मतशक्तिवादस्य परिशीलनं, ब्रह्मकारणवादपरिशीलनं, प्रधानकारणवादपरिशीलनं, विचित्रकारणसाधनं, प्रतिबन्धकसंसर्गाभावस्य कारणत्वव्यवस्थापनं च अवगन्तुं शक्नुवन्ति।
- ❖ संस्कारस्य भोग्यनिष्ठत्वपक्षपरिशीलनं, चार्वाकसम्मतदेहात्मवादपरिशीलनं, बौद्धसम्मतक्षणभङ्गवादपरिशीलनं, आत्मनः कारणताव्यवस्थापनं चावगन्तुं शक्नुवन्ति।
- ❖ वेदकर्तृत्वेन ईश्वरसाधनं, प्रलयबाधकहेतुपरिशीलनं, प्रलयसाधकहेतुव्यवस्थापनं च अवगन्तुं शक्नुवन्ति।
- ❖ अनुपलब्धेः ईश्वरबाधकत्वनिरासक्रमम्, अनुमानस्य ईश्वरबाधकतायाः निराकरणप्रकारं, योग्यानुपलब्धेः अभावसाधनत्वम्, अनुमानस्य ईश्वराभावाऽसाधकतां, शब्दप्रमाणस्य ईश्वराऽबाधकताम्, ईश्वरस्य संशयगोचरताऽनिरासक्रमम्, उपाधिशङ्कायाः अनुमानबाधकतायाः निरासक्रमम् च अवगन्तुं शक्नुवन्ति।

- ❖ उपमानस्य ईश्वराबाधकताम्, उपमानस्य प्रमाणान्तरत्वसाधनं, शब्दस्य अनुमाने अन्तर्भावनिराकरणं, प्राभाकराभिमतस्य लौकिकशब्दानुवादकतापक्षस्य परिशीलनं, अर्थापत्तेः ईश्वराऽबाधकताम्, अर्थापत्तेः अनुपलब्धेश्च प्रमाणान्तरत्वनिरासक्रमं च विज्ञातुं शक्नुवन्ति।
- ❖ ईश्वरज्ञानस्य अप्रमात्ववादिपूर्वपक्षं तन्निरासं, मीमांसकसम्मतज्ञाततापक्षस्य परिशीलनं, ज्ञाततां विनैव कर्मणां भेदसाधनम्, ईश्वरज्ञानगत प्रमात्वस्वरूपं तत्साधनं चावगन्तुं शक्नुवन्ति।
- ❖ ईश्वरसाधकहेत्वष्टकं, कार्यत्वहेतौ दोषपञ्चकापादनं तन्निराकरणम्, ईश्वरबाधकतर्कनिराकरणम्, ईश्वरसाधकतर्कं, कार्यत्वहेतोः अप्रयोजकत्ववादिपूर्वपक्षस्य निराकरणं, धृत्यादिहेतूनां प्रयत्नजन्यत्वे प्रमाणं च अवगन्तुं शक्नुवन्ति।
- ❖ विधिप्रत्ययबलात् ईश्वरसाधनं, विधिप्रत्ययार्थम्, आख्यातार्थं, कर्तरि आख्यातशक्तिनिवारणं, कर्मनिष्ठधर्मस्य विध्यर्थत्वनिवारणम्, अभिधायाः शाब्दभावनायाः विध्यर्थत्वनिवारणम्, इष्टसाधनत्वस्य विध्यर्थत्वनिवारणम्, आप्ताभिप्रायस्य विध्यर्थत्वव्यवस्थापनम्, ईश्वरसाधकहेत्वन्तरं चावगन्तुं शक्नुवन्ति।

**********